CLASS : 10th (Secondary) **Code No. 4208**

Series : Sec. M/2019

रोल नं० | | | | | | | | | | |

SET : A

संस्कृत

(Academic/Open)

(Only for Fresh Candidates)

शेमुषी (नई पुस्तक)

समय : ***3*** *घण्टे]* *[पूर्णांक :* ***80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ* ***15*** *तथा प्रश्न* ***20*** *हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये* ***कोड नम्बर*** *तथा* ***सेट*** *को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/ पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है,* ***परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

निर्देश : —

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टलेखः लेखनीयः।

खण्डः 'क'
(अपठित–अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा निम्नांकितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत — $4 \times 2 = 8$

अस्मिन् संसारे बहूनि धनानि सन्ति। तेषु विद्याधनं सर्वश्रेष्ठं धनम् अस्ति। इदं धनं चौराः चोरयितुं समर्थाः न सन्ति। राजा हर्तुं न प्रभवति। भ्रातरः भाजयितुं न योग्याः। जनाः यथा यथा धनं व्ययन्ति तथा तथा धनं अल्पतरं भवति। किन्तु विद्याधनं यथा यथा व्ययते तथा तथा प्रतिदिनं वर्धते। अतः विद्याधनं सर्वधनं प्रधानं कथ्यते। विद्यारहितः पशुना तुल्यः जनः संसारे भवति।

प्रश्नाः —

(क) विद्याधनं कः हर्तुं न प्रभवति ?

(ख) किं धनं सर्वश्रेष्ठं धनं संसारे अस्ति ?

(ग) चौराः किं कर्तुं समर्थाः न सन्ति ?

(घ) विद्यारहितः जनः केन तुल्यः भवति ?

खण्डः 'ख'

(रचनात्मकं - कार्यम्)

2. भ्रातृविवाहे दिनद्वयार्थं लिखिते अवकाशप्रार्थनापत्रे रिक्तस्थानानि उचितमंजूषापदैः पूरयत — $4 \times 1 = 4$

सेवायाम्

प्रधानाचार्यः महोदयः
रा० व० मा० विद्यालयः,
अ-ब-स नगरम्।

श्रीमन् !

सविनयं निवेदनम् .....(i)..... यत् मम भ्रातुः विवाहः 'मे' मासस्य पंचम्यां तिथौ .....(ii).....। तत्र मम .....(iii)..... आवश्यकी वर्तते। अतः चतुर्थ पंचम दिनांकयोः .....(iv)..... अवकाशं मह्यं प्रदाय अनुगृह्णन्तु भवन्तः।

भवतां शिष्यः
रमाकान्तः
कक्षा - दशमी
अनु० पंचमः

मंजूषा

द्विनद्वयार्थम्, उपस्थितिः, अस्ति, भविष्यति।

3. चित्रं दृष्ट्वा अधः प्रदत्तवाक्यानि पठित्वा च रिक्तस्थानानि उचितमंजूषापदैः पूरयत — $4 \times 1 = 4$



वाक्यानि –

(क) चित्रमिदं ..... अस्ति।

(ख) वृक्षे ..... खगाः तिष्ठन्ति।

(ग) वृक्षस्य समीपे एकः ..... नृत्यति।

(घ) चित्रे एकः ..... अपि अस्ति।

मंजूषा

जलाशयः, मयूरः, अनेके, वृक्षस्य।

खण्डः 'ग'

(पठित–अवबोधनम्)

4. अधोनिर्दिष्टगद्यांशस्य सप्रसंगं हिन्दीभाषया सरलार्थं लिखत –

$1 \times 4 = 4$

अग्रिमे दिने स आरक्षी चौर्याभियोगे तं पुरुषं न्यायालयं नीतवान्। न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक् पृथक् विवरणं श्रुतवान्।

अथवा

मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रम् आगच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद।

5. अधोनिर्दिष्टश्लोकस्य सप्रसंगं हिन्दीभाषया सरलार्थं लिखत — $1 \times 4 = 4$

शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता।

दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा।।

अथवा

मृगा मृगैः संगमनुव्रजन्ति, गावश्च गोभिः तुरगास्तुरंगैः।

मूर्खाश्च मूर्खैः सुधियः सुधीभिः, समानशील व्यसनेषु सख्यम्।।

6. निर्दिष्टसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषया लिखत — $2 \times 2 = 4$

(क) शुचि पर्यावरणम्।

(ख) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

(ग) प्राणेभ्योऽपि प्रियः सुहृद्।

(घ) यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।

7. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $4 \times 1 = 4$

(i) मालाकारः तोयैः तरोः पुष्टिं करोति।

(ii) भृंगाः रसालमुकुलानि समाश्रयन्ते।

(iii) पतंगाः अम्बरपथम् आपेदिरे।

(iv) जलदः नानानदीनदशतानि पूरयित्वा रिक्तोऽस्ति।

8. प्रदत्तगद्यांशं पठित्वा प्रश्नोत्तराणि संस्कृतेन लिखत – $2 \times 1 = 2$

तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। $2 \times 1 = 2$

प्रश्नौ –

(क) राजपुत्रस्य किं नाम आसीत् ?

(ख) बुद्धिमती कस्य भार्या आसीत् ?

9. प्रदत्तश्लोकं पठित्वा प्रश्नोत्तराणि संस्कृतेन लिखत — $2 \times 1 = 2$

उदीरितोऽर्थः पशुनापि गृह्यते,

हयाश्च नागाश्च वहन्ति बोधिताः।

प्रश्नौ –

(क) बोधिताः के के वहन्ति ?

(ख) केन उदीरितोऽर्थः गृह्यते ?

10. प्रश्नपत्रे लिखितश्लोकान् विहाय 'शेमुषी भाग-2' पुस्तकात् एकं शुद्धं श्लोकं संस्कृतेन लिखत। $1 \times 4 = 4$

खण्डः 'घ'

(अनुप्रयुक्त–व्याकरणम्)

11. गुणसन्धेः ***अथवा*** विसर्गसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। $1 \times 2 = 2$

12. द्वन्द्व ***अथवा*** अव्ययीभाव समासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। $1 \times 2 = 2$

13. करणकारकस्य ***अथवा*** अधिकरणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। $1 \times 2 = 2$

14. यथानिर्दिष्टशब्दरूपाणि लिखत — $4 \times 1 = 4$

(क) 'देव' — तृतीयाविभक्ति — एकवचने =

(ख) 'कवि' — चतुर्थीविभक्ति — एकवचने =

(ग) 'तद्' — (पुल्लिंग) षष्ठीविभक्ति — बहुवचने =

(घ) 'युष्मद्' — प्रथमाविभक्ति — बहुवचने =

15. यथानिर्दिष्टधातुरूपाणि लिखत — $4 \times 1 = 4$

(क) 'कृ' — लट्लकार — प्रथमपुरुष — एकवचने =

(ख) 'अस्' — लङ्लकार — प्रथमपुरुष — एकवचने =

(ग) 'पठ्' — लृट्लकार — मध्यमपुरुष — बहुवचने =

(घ) 'गम्' — (गच्छ्) लोट्लकार— मध्यमपुरुष — बहुवचने =

16. प्रदत्त-उपपदविभक्तिवाक्येषु उचितविभक्तिप्रयोगं कुरुत — $4 \times 1 = 4$

(क) ..... निकषा मृतशरीरं वर्तते। (राजमार्गं/ राजमार्गेण)

(ख) छात्रः ..... प्रति गच्छति। (विद्यालयात्/विद्यालयं)

(ग) अध्यापकः ..... पुस्तकं यच्छति। (छात्रं/छात्राय)

(घ) ..... बहिः वनम् अस्ति। (ग्रामं/ग्रामाद्)

17. प्रदत्तवाक्येषु रिक्तस्थानपूर्तिम् अव्ययपदैः कुरुत — $3 \times 1 = 3$

(क) ..... जीवनं दुर्वहम् अस्ति। (अत्र/तत्र)

(ख) भूकम्पित-समये ..... गमनमेव उचितम्। (बहिः/दूरम्)

(ग) इदानीं वायुमण्डलं ..... दूषितमस्ति। (एव/भृशं)

18. अधोलिखितपदेभ्यः उपसर्गान् पृथक् लिखत — $3 \times 1 = 3$

(i) संगमनम्

(ii) प्रपश्यामि

(iii) निर्मलम्

खण्डः 'ङ'

(लघूत्तरप्रश्नाः)

19. यथानिर्दिष्टप्रश्नानाम् उत्तराणि संस्कृते एकपदेन लिखत –

(i) ***द्वयोः*** पदयोः विलोमपदानि लिखत – $2 \times 1 = 2$

(क) आदरः

(ख) दोषः

(ग) पूर्वम्

(घ) अत्र

(ii) ***द्वयोः*** पदयोः पर्यायपदानि लिखत – $2 \times 1 = 2$

(क) शत्रुः

(ख) मित्रम्

(ग) अग्निः

(घ) अश्वः

(iii) ***द्वयोः*** पदयोः प्रकृतिं प्रत्ययं च पृथक् पृथक् कृत्वा लिखत — $2 \times 1 = 2$

(क) चलितः

(ख) गतः

(ग) सहिष्णुता

(घ) अग्नित्वम्

(iv) ***द्वयोः*** अंकयोः स्थाने संख्यावाचीपदं लिखत — $2 \times 1 = 2$

(क) 15 (ख) 41

(ग) 80 (घ) 90

(v) ***द्वयोः*** अंकयोः स्थाने घटिकासमयं लिखत — $2 \times 1 = 2$

(क) बारह बजे

(ख) एक बजे

(ग) दो बजे

(घ) तीन बजे

खण्डः 'च'

(बहुविकल्पीयप्रश्नाः)

20. प्रदत्तचतुर्षु उत्तरेषु शुद्धम् उत्तरं चित्वा लिखत — $6 \times 1 = 6$

(क) 'पदातिरेव' अत्र किं सन्धिच्छेदपदम् ?

(i) पदातिः + एव

(ii) पदतिः + एव

(iii) पादतिः + एव

(iv) पदाति + रेव

(ख) 'निशा + अन्धकारे' अत्र किं सन्धिपदम् ?

(i) शिनान्धकारे

(ii) निशन्धकारे

(iii) नीशान्धकारे

(iv) निशान्धकारे

(ग) 'पीतं च तत् पंकजम्' अत्र किं समस्तपदम् ?

(i) पीतपंकजम्

(ii) पितपंकजम्

(iii) पीतापंजम्

(iv) पीताजम्

(घ) 'प्रतिगृहम्' अत्र किं विग्रहपदम् ?

(i) गृहं गृहं प्रति

(ii) ग्रहम्-ग्रहम् प्रति

(iii) गृह-गृह प्रति

(iv) ग्रह-ग्रह प्रति

(ङ) 'श्लाघा' इति पदस्य विशेष्यपदं चिनुत –

(i) कथा

(ii) काथा

(iii) काया

(iv) कायः

(च) 'स्पर्शः' इति पदस्य विशेषणपदं चिनुत –

(i) हृदग्राही

(ii) ह्रादग्राही

(iii) हृद्ग्राही

(iv) हृदयग्राही